संस्कृत वार्ता:

दिनाङ्क: 06.03.2026 प्रात: - 06:55

अथ वार्ताः

प्रधानमन्त्री - कृषिः:

प्रधानमंत्री नरेन्द्र मोदी अद्य प्रातः दृश्य-सम्मेलनद्वारा कृषिग्रामीणपरिवर्तनविषये पश्चात्-बजट-वेबिनार-सत्रं सम्बोधयिष्यति। अस्मिन् कार्यक्रमे कृषिः, पशुपालनं तथा दुग्धपालनं, मत्स्यपालनं, ग्रामीणजीविका इति चतुर्भिः प्रमुखक्षेत्रैः समाविष्टानि अष्टानि विभिन्नानि वेबिनारसत्राणि आयोजितानि सन्ति। बजट इति आयव्यय-प्रतिवेदनोत्तर-वेबिनार-सत्रं शुष्कफलानाम्, नारिकेलस्य, चंदनस्य, अगरवृक्षस्य च क्षमताम् उद्घाट्य उच्चमूल्यकृषेः प्रचारं कर्तुं केन्द्रीभवति ।

प्रधानमन्त्री – फ्रेंच राष्ट्रपतिः –

प्रधानमन्त्री नरेन्द्र मोदी ह्यः फ्रेंच-राष्ट्रपतिना इमैनुएल मैक्रोन् इत्यनेन सह वार्तालापं कृतवान् । सामाजिक-माध्यम-सन्देशे श्रीमोदी अवदत् यत् ते पश्चिम-एशियायाः घटनाक्रमस्य विषये चर्चां कृत्वा संवाद-कूटनीत्यादि-विषये पुनरागमनस्य आवश्यकताः पुष्टीकृतवन्तः । सः अवदत् यत् क्षेत्रे शान्तेः स्थिरतायाः च शीघ्रं पुनस्थापनार्थं देशद्वयं निरन्तरं निकटतया संलग्नं भविष्यति, प्रयत्नस्य समन्वयं च करिष्यति।

राइसिना-संवादः ::

प्रधानमन्त्री नरेन्द्र मोदी ह्यः नवदिल्लीनगरे राइसिना-संवादः इत्यस्य भूराजनैतिक-भू-अर्थशास्त्रीय सम्मेलनस्य एकादशतम-संस्करणस्य उद्घाटनं कृतवान् । मुख्यभाषणं कुर्वन् फिन्लैण्ड्-देशस्य राष्ट्रपतिः डॉ. अलेक्जेण्डर् स्टब् इत्यसौ उक्तवान् यत् वैश्विकदक्षिणम्, अग्रिमविश्वव्यवस्थायाः निर्णयं करिष्यति, तस्मिन् च भारतं निर्णायकं कारकं भविष्यति। नूतनविश्वव्यवस्थायाः स्वरूपनिर्माणविषये डॉ. स्टब इत्यनेन प्रकाशितं यत् भारतं सहस्रवर्षेभ्यः मूल्याधारित-वास्तविकवादे विश्वसिति। सः अवदत्, एतत् स्पष्टम् अस्ति यत् भारतं संयुक्तराष्ट्रसङ्घस्य रचनात्मकसदस्यत्वेन कथं कार्यं करोति । डॉ स्टब इत्यनेन प्रोक्तं यत्, संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषदि भारतस्य स्थायी आसनं भवितुमर्हति ।

भारत-फिनलैण्ड

प्रधानमन्त्री नरेन्द्र मोदी तथा फिनलैण्ड राष्ट्रपतिः अलेक्जेण्डर् स्टब् इत्युभावपि नियमाधारित-अन्ताराष्ट्रिय-व्यवस्थां, बहुपक्षीयसहकार्यं च प्रति स्वप्रतिबद्धतां पुनः पुष्टीकृतवन्तौ । फिन्लैण्ड्-राष्ट्रपतेः भारतस्य यात्रायाः अनन्तरं भारत-फिन्लैण्ड्-संयुक्तवक्तव्ये उक्तं यत्, उभौ नेतारौ भारतस्य फिन्लैण्ड्-देशस्य च परस्परसम्मानस्य आधारेण लोकतन्त्रस्य मूल्येषु निर्मितम्, तथैव वैश्विकशान्तिं, सुरक्षां, अन्ताराष्ट्रिय-विधिं च प्रति प्रतिबद्धतायाः आधारेण निर्मितम् गहन-स्थायि-मैत्र्याः पुष्टिं कृतवन्तौ ।।

राज्यपाल नियुक्ति ::

राष्ट्रपतिः द्रौपदी मुर्मूः विभिन्नेषु राज्येषु केन्द्रशासितप्रदेशेषु च राज्यपालस्य नियुक्तिम् अकरोत् । हिमाचलप्रदेशस्य राज्यपालः शिवप्रताप-शुक्लः तेलङ्गानाराज्यस्य राज्यपालत्वेन नियुक्तः अस्ति । तेलंगाना राज्यपालः जिष्णु देव वर्मा महाराष्ट्रस्य राज्यपालत्वेन नियुक्तः वर्तते । बिहारस्य पूर्वविधानसभा अध्यक्षः नन्दकिशोरयादवः नागालैण्डस्य राज्यपालत्वेन नियुक्तः। सेवानिवृत्त लेफ्टिनेंट जनरल सैयद अता हसनैनः बिहारस्य राज्यपालत्वेन नियुक्तः । तमिलनाडुराज्यस्य राज्यपालः आर.एन.रविः पश्चिमबङ्गस्य राज्यपालरूपेण नियुक्तः अस्ति। केरलस्य राज्यपालः राजेन्द्र विश्वनाथ अर्लेकरः तमिलनाडुराज्यस्य राज्यपालत्वेन नियुक्तः। राष्ट्रपतिः पश्चिमबङ्गस्य राज्यपालस्य डॉ. सी.वी. आनन्द बोस इत्यस्य त्यागपत्रमपि स्वीचकार । लद्दाखस्य उपराज्यपालः कविन्दरगुप्तः हिमाचलप्रदेशस्य राज्यपालत्वेन नियुक्तः अस्ति। दिल्ल्याः उपराज्यपालः विनय-कुमार-सक्सेना लद्दाखस्य उपराज्यपालरूपेण नियुक्तः अस्ति। पूर्वकूटनीतिज्ञः तारञ्जित-सिंह-संधुः दिल्ल्याः उपराज्यपालरूपेण नियुक्तः अस्ति।

पीएम मेट्रो::

प्रधानमंत्री नरेन्द्र मोदी रविवासरे राष्ट्रियराजधान्यां द्वयोः नवीनमेट्रो-मार्गयोः उद्घाटनम्, अथ अतिरिक्त-मार्गत्रयस्य आधारशिलास्थापनं च करिष्यति ।

क्रिकेट्

अन्ताराष्ट्रिय-पुरुष-विंशतिम्-प्रतिविंशतिः क्रिकेट-विश्वचषक-क्रीडायां ह्यः रात्रौ मुम्बई-वांखेडे-क्रीडांगणे, रोचक-द्वितीय-उपान्त्यचक्रे, भारतदलम्, इंग्लैण्ड दलं सप्त-स्तोभकैः पराजित्य अन्तिमचक्रे प्रवेशम् अकरोत् । रविवासरे अहमदाबादनगरस्य-नरेन्द्रमोदी-क्रीडांगणे भारतदलं अन्तिमचक्रे न्यूझिलैण्ड् दलं सम्मुखीकरिष्यति।

।। इति वार्ताः।।